* H K - 0 0 1 - 0 1 4 3 0 1 *

# HK-001-014301

Seat No. ________

## M. A. (Sem. III) (CBCS) Examination

**May / June – 2017**

**Sanskrit : ECT-7**

***(Unseen and Essay)***

***(Old Course)***

**Faculty Code : 001**
**Subject Code : 014301**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

૧ નીચેનામાંથી કોઈપણ **એક** ગદ્યખંડને આધારે પ્રશ્નોના જવાબ સંસ્કૃતમાં આપો : **૧૪**

1 Answer the following question in Sanskrit of any **one** of the following : **14**

(१) कस्मिंश्चिद् वनोद्देशे चटकदम्पती तमालतरुकृतनिलयौ प्रतिवसतः स्म । अथ तयोर्गच्छता कालेन सन्ततिरभवत् । अन्यस्मिन्नहनि प्रमत्तो वनगजः कश्चित्तं तमालवृक्षं धर्मार्तश्छायार्थी समाश्रितः । ततो मदोत्कर्षात्तां तस्य शाखां चटकाश्रितां पुष्करेणाकृष्य बभञ्ज । तस्या भङ्गेन चटकाण्डानि सर्वाणि विशीर्णानि । आयुः शेषतया च चटका प्राणैर्न वियुक्ता । अथ सा स्वाण्डङ्गाभिभूता प्रलापान्कुर्वाणा न कथंचिदतिष्ठत् । अत्रान्तरे तस्यास्तान् प्रलापाञ्छ्रुत्वा काष्ठकुटो नाम पक्षी तस्याः परमसुहृत्तद्दुःखदुःखितोऽभ्येत्य तामुवाच – भगवति ! किं वृथा प्रलापेन ? उक्तं च –

नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।
पण्डितानां च मूर्खाणां विशेषोऽयं यतः स्मृतः ॥

(१) चटकदम्पती कुत्र प्रतिवसतः स्म ?
(२) एकदा कः तमालवृक्षं समाश्रितः ? किमर्थम् ?
(३) कथं चटकाण्डानि विशीर्णानि जातानि ?
(४) केन चटका समाश्वासिता ? किमर्थम् ?
(५) पण्डितानां मूर्खाणां च कः विशेषः ?
(६) गद्यखण्डे प्रयुक्तः पुष्करः शब्दस्य कोऽर्थः अस्ति ?
(७) 'प्रतिवसतः स्म' इति प्रयोगस्य स्थाने ह्यस्तनभूतकालस्य प्रयोगं कुरु ।

(२) कालिदासादीनामिव यशः । श्रीहर्षादेर्धावकादीनामिव धनम् । राजादिगतोचिताचारपरिज्ञानम् । आदित्यादेमर्यूरादीनामिवानर्थनिवारणम् । सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादसमुद्भूतं विगलितवेद्यान्तरं प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादि–

इतिहासेभ्यश्चः शब्दार्थयोः गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणं कविकर्म तत् कान्ते सरसतापादनेन अभिमुखीकृत्य रामादिवद् वर्तितव्यं न रावणादिवत् – इति उपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।

(१) काव्येन किं किं प्राप्यते ?

(२) काव्यं कीदृशं परिज्ञानं करोति ?

(३) काव्यं कथं विलक्षणम् ?

(४) काव्यं कान्तेव किमुपदिशति ?

(५) किं सकलप्रयोजनमौलिभूतम् ?

(६) गद्यखण्डे प्रयुक्तान् विध्यर्थकृदन्तान् दर्शयत ।

(७) अस्य गद्यांशस्य योग्यं शीर्षकं लिखत ।

२ નીચેનામાંથી કોઈપણ **એક**નો અનુવાદ કરો : **१४**

**2** Translate any **one** of the following : **14**

(१) अथासौ जातसम्भ्रमा प्राप्तैवेयं भर्तृदारिका कन्दुकावती कन्दुकक्रीडितेन देवीं विन्ध्यवासिनीमाराधयितुम् । अनिषिद्धदर्शनो चेयमस्मिन्कन्दुकोत्सवे । सफलमस्तु युष्मच्चक्षुः । आगच्छ तां द्रष्टुम् । अहं अस्याः सकाश वर्तिनी भवेयम् । तामन्नयाव आवाम् । महति रत्नरङ्गपीठे स्थितां प्रथमं ताम्रोष्ठीमपश्यम् । अतिष्ठच्च सद्य एव मम हृदये । न मया अन्येन वान्तराले दृष्टा । चित्रीया विष्ट चित्तश्चाचिन्तयम् – ''किमियं लक्ष्मीः ? नहि नहि । तस्याः किल हस्ते विन्यस्तं कमलम् । अस्यास्तु हस्तमेव कमलम् । भुक्तपूर्वा च सा पुरातनेन पुंसा पूर्वराजैश्च, अस्याः पुनरवद्यमयातयामं च यौवनम् ।'' इति चिन्तयन् एव सा अनघसर्वगात्री व्यत्यस्तहस्तपल्लावाग्रस्पृष्टभूमिरालोलनीलकुटिलालका सविभ्रमं भगवतीमभिवन्द्य कन्दुकममन्दरागरूषिताक्षमनङ्गमिवावलम्बत । लीलाशिथिलं च भूमौ मुक्तवती ।

(२) 'अथ तस्यास्तमालिका नाम सारिका तत्प्रियसखिभिः समं समालोच्य कन्दर्पकेतोर्भावमाकलयितुं प्रेषिता । सापि मया सार्धं प्रस्थिता गता चात्रैव तरोरधस्तात्तिष्ठति ।' इत्युक्त्वा सा विरराम । अथ तच्छ्रुत्वा सहर्षं समुत्थाय मकरन्दस्तां तमालिकामाहूय विदितवृत्तान्तामकरोत् सा. तु तस्मै कृतप्रणामा तां पत्रिकामुपानयत् । अथ मकरन्दस्तामादाय पत्रिकां विस्रस्य स्वयमेवावाचयत् ।

प्रत्यक्षदृष्टभावाप्यस्थिरहृदया हि कामिनी भवति ।
स्वप्नानुभूतभावा द्रढ्यति न प्रत्ययं युवतिः ॥

तच्छ्रुत्वा कन्दर्पकेतुरमृतार्णवनिमग्नमिव, सर्वानन्दानामुपरिवर्तमानमिवात्मानं मन्यमानो मन्दं मन्दमुत्थाय प्रसारितबाहुयुगलस्तमालिकामालिलिङ्ग । अथ तयैव सार्धं समासीनः किं करोति, किं वदति, कथमास्ते इत्यादि सकलं वासवदत्तावृत्तान्तमपृच्छत् । तं च दिवसं तत्रैवातिवाह्य तस्मात् प्रदेशात्तया ससुहृत्कन्दर्पकेतुः । अत्रान्तरे भगवानपि मरीचिमाली वृत्तान्तमयुं कथयितुमिव मध्यमं लोकमवततार ।

૩ નીચેનામાંથી કોઈપણ **એક**નો સંસ્કૃતમાં અનુવાદ કરો : ૧૪

**3** Translate any **one** of the following into Sanskrit : **14**

(૧) પ્રાચીનકાળમાં નચિકેતા નામે એક પ્રામાણિક છોકરો હતો. એના પિતા યજ્ઞમાં ઘરડી ગાયો બ્રાહ્મણોને દાનમાં આપતા હતા. એ જોઈને નચિકેતાને થયું કે પિતાજી નકામી થઈ ગયેલી વસ્તુઓનું દાન કરે છે પરંતુ પોતાને વહાલી એવી એક પણ ચીજ આપતા નથી. અને એ સિવાય યજ્ઞ શેનો કર્યો કહેવાય ? તેથી તેણે પિતાજીને કહ્યું, ''પિતાજી, તમે નકામી વસ્તુઓનું દાન કરો છો, પણ એક પણ વહાલી વસ્તુ કોઈને આપતા નથી.'' એક વાર કહ્યું, બે વાર કહ્યું. એટલે પિતાજી ગુસ્સે થઈને બોલ્યા, ''ત્યારે તને જ આપું.'' ''કોને આપશો ?'' ''યમરાજાને''.

(1) In ancient times there was an honest boy Nachiketa by name. His father was giving away in charity old cows to the Brahmins. Seeing this Nachiketa thought my father gives away useless things but does not give a single thing dear to him. And without that, how can the sacrifice be said to have been done. So he said to his father, "Father ! you are giving away useless things, but are not giving dear things to any one. He said it once, and twice. So the father became angry and said, "Then I shall give you away." "To whom, will you give ?" "To Lord Yama."

(૨) એક વાર રાજા દિલીપે અશ્વમેધ યજ્ઞ કરવા માટે એક ઘોડો છૂટો મૂક્યો. તેના રક્ષણની જવાબદારી રઘુને સોંપી. રઘુ ઘોડાની પાછળ-પાછળ ચાલવા લાગ્યો. 'દિલીપ સો યજ્ઞો કરીને મારું સ્થાન લઈ લેશે' એ ડરથી ઈન્દ્રે ગુપ્ત રીતે ઘોડો ચોરી લીધો. નન્દિનીની કૃપાથી રઘુએ એ વાત જાણી અને પ્રથમ સામનીતિ અનુસાર તેણે દેવેન્દ્રની પાસેથી ઘોડો પાછો માગ્યો. પરંતુ ઈન્દ્ર પાસેથી ઘોડો ન મળતાં રઘુએ દેવેન્દ્ર સાથે યુદ્ધનો આરંભ કર્યો. તે બન્ને વચ્ચે યુદ્ધ થતાં રઘુએ જ પહેલાં દેવેન્દ્રના હૃદય પર બાણ માર્યું. તે પ્રહારથી ગુસ્સે થઈને ઈન્દ્રે પણ બાણનો પ્રહાર કર્યો. દાનવોના લોહીને સતત પીતા રહેવાથી તથા માનવ લોહીના સ્વાદથી અજાણ્યું તે બાણ જાણે કે રઘુનું લોહી પીવા લાગ્યું.

(2) Once upon a time the king Delip let lose horse for Ashvamedha sacrifice. Raghu was appointed as its protector. Raghu started following the horse. Indra having been afraid that Dilip would take his place by completing hundred sacrifices, stole the horse secretly. By the grace of Nandini Raghu knew this fact and he adopted the policy of negotiation and asked Lord Indra

to return the horse. But horse having not been returned, Raghu started war with Lord Indra. War being started between those two, at first, Raghu attacked with an arrow on the heart of Lord Indra. Indra having been angered by the blow struck Raghu with an arrow. As it having been used to drink the blood of demons and unfamiliar with human blood, it started drinking Raghu's blood.

૪ નીચેનામાંથી કોઈપણ **એક** પર સંસ્કૃતમાં નિબન્ધ લખો : **૧૪**

**4** Write an essay in Sanskrit on any **one** of the following : **14**

(१) आचारः परमो धर्मः ।

(२) सत्यमेव जयते ।

(३) विद्याधनं सर्वधनप्रधानम् ।

(४) कविताकामिनीविलासः कालिदासः ।

(५) कारुण्यं भवभूतिरेव तनुते ।

૫ નીચેનામાંથી કોઈપણ **બે** શ્લોકોનો અનુવાદ કરો : **૧૪**

**5** Translate any **two** of the following verses : **14**

(१) धर्मः प्रव्रजितस्तपः प्रचलितं सत्यं दूरे गतं
पृथ्वी मन्दफला नराः कपटिनश्चित्तं च शाठ्योर्जितम् ।
राजानोऽर्थपरा न रक्षणपराः पुत्राः पितुर्द्वेषिणः
साधुः सीदति दुर्जनः प्रभवति प्राप्ते कलौ दुर्युगे ॥

(२) देवानामिदमामनन्ति मुनयः क्रान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥

(३) मुग्धा दुग्धधिया गवां विदधते कुम्भानधो बल्लवाः
कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि ।
कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका ॥

(४) लूनं मत्तगजैः कियत्कियदपि च्छिन्नं तुषारार्दितैः
शिष्टं ग्रीष्मजभीष्मभानुकिरणैर्भस्मीकृतं काननम् ।
एषा कोणगता मुहुः परिमलैरामोदयन्ती दिशो
हा कष्टं ललिता लवङ्गलतिका दावाग्निना दह्यते ॥